## सपत्नीशब्दविचारः

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity
Enathur, Kanchipuram - 631561

**प्रधानांशाः**

1.सपत्नीशब्दस्य पुंवद्भावविषये विशेषविचारः

2.सिद्धान्तकौमुदीरीत्या सपत्नी शब्दस्य त्रैविध्यम्

3.सपत्नीशब्दस्त्रिधा

4.तत्वबोधिनी-बालमनोरमाकारयोः व्याख्या

5.भाष्यरीत्या द्वितीयशब्दो नास्ति

6.अत्र लघुशब्देन्दुशेखरकाराणामाशयः

**सपत्नीशब्दविचारः**

भसंज्ञकस्य स्त्रीवाचकस्य ढभिन्ने तद्धिते परे पुंवद्रूपं भवतीति वार्तिकार्थः। हस्तिनीनां समूह इत्यर्थे हस्तिनी शब्दात् ठकि,ठस्येकादेशे हस्तिनीशब्दस्य पुंवद्भावेन 'हास्तिकम्' इति रूपसिद्धिः।
एवं सपत्न्याः अपत्यं 'सापत्न' इत्यत्रापि सपत्नी शब्दात् अमि पुंवद्भावेन 'सापत्न' इति, ण्यप्रत्यये पुंवद्भावेन 'सापत्य' इति च सिध्यति। अत्र सपत्नीशब्दस्य त्रिधा व्युत्पादनं भट्टोजीदीक्षितेन कौमुद्यां प्रदर्शितम्। तच्च विशेषविचारमर्हतीति तद्विषये किञ्चिदत्र प्रस्तूयते।

**सपत्नीशब्दस्य पुंवद्भावविषये विशेषविचारः**

**सिद्धान्तकौमुदीरीत्या सपत्नी शब्दस्य त्रैविध्यम्**

सिद्धान्तकौमुद्यां बहुव्रीहिसमासप्रकरणे पुंवद्भावघट्टे "तसिलादिष्वाकृत्वसुचः"(अष्टा-6-3-35) इति सूत्रान्तर्गतस्य "भस्याढे तद्धिते" इति वार्तिकस्य व्याख्यायां सपत्नीशब्दविषये भट्टोजीदीक्षितेन इत्थमुक्तम्-
सपत्नीशब्दस्त्रिधा। शत्रुपर्यायात् सपत्नशब्दात् शारङ्गरवादित्वात् ङीन्येकः। समानः पतिः यस्याः इति विग्रहे विवाहनिबन्धनं पतिशब्दमाश्रित्य नित्यस्त्रीलिङ्गो द्वितीयः। स्वामिपर्यायपतिशब्देन भाषितपुंस्कः तृतीयः। आद्ययोःशिवाद्यण्। सपत्न्या अपत्यं सापत्नः। तृतीयात्तु लिङ्गविशिष्टपरिभाषया पत्युत्तरपदलक्षणो ण्य एव न त्वण्, शिवादौ रूढयोरेव ग्रहणात्-सापत्यः इति[1] ।

---

[1]सिद्धान्तकौमुदी-पृ-193.

तत्वबोधिनी-बालमनोरमाकारयोः व्याख्या तत्वबोधिनी, बालमनोरमाकाराभ्यां पूर्वोक्तदीक्षितग्रन्थाशयः एवं वर्णितः लोके सपत्नीशब्दः प्रसिद्धः। स च त्रेधा व्युत्पाद्यते- सपत्नशब्दः शत्रुपर्यायः, अत्र च "व्यन् सपत्ने" (अष्टा-4-1-145) इति सूत्रम्,'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इति कोशश्च प्रमाणम्। ततः स्त्रियां "शार्ङ्गरवाद्यञो ङीन्" (अष्टा-4-1-73) इति ङीनि सपत्नीति रूपम्।

समानः पतिः यस्याः इत्यर्थे विवाहरूपसंस्कारं निमित्तीकृत्य प्रवृत्तः शब्दः समानपतिः, तत्र "नित्यं सपत्न्यादिषु"(अष्टा-4-1-35) इति सूत्रेण समानशब्दस्य सादेशः नकारश्चान्तादेशः। ङीपि सपत्नी। अयं तु नित्यस्त्रीलिङ्गः , न भाषितपुंस्कः। समानः पतिः परिपालकः यस्या इति विग्रहेपि "नित्यं सपत्न्यादिषु" इति निष्पन्नः। अयं तु न भाषितपुंस्कः। एभ्यः तद्धितप्रत्यये पुंवद्भावे रूपभेदो विद्यते। यथा- सपत्न्याः अपत्यमित्यर्थे "तस्यापत्यम्" (अष्टा-4-1-92) इत्यणं बाधित्वा "स्त्रीभ्यो ढक्" इति ढक् प्राप्नोति। तं बाधित्वा "शिवादिभ्यो अण्" इति शिवादिपाठेन अण् भवति। शिवादिगणे सपत्नीशब्दः पठ्यते। आद्ये "तसिलादिष्वाकृत्वसुचः" इति सूत्रे पठितेन "भस्याढे तद्धिते" इति वार्तिकेन सापत्नः। द्वतीये न पुंवद्भावः, नित्यस्त्रीलिङ्गत्वेन अभाषितपुंस्कत्वात्। अतः तत्रापि सापत्नः इत्येव रूपम्।

**अयं तु विशेषः**

आद्ये पुंवद्भावेपि नकारः स्वाभाविकः। द्वितीये पुंवद्भावाभावात् नकारो न निवर्तते। आद्यो रूढः, द्वितीयस्तु योगरूढः। एवञ्चोभयोरपि अपत्यप्रत्यये रूपं तुल्यमेव। तदुक्तम्- "आद्ययोः शिवाद्यण् सापत्नः" इति। तृतीयस्तु भाषितपुंस्कः केवलं यौगिकः। अतस्तस्मात् शिवाद्यण् न प्रवर्तते, तत्र रूढयोरेव ग्रहणात्। अतः "दित्यदित्यादित्यपत्युत्तरपदाण्यः" (अष्टा-4-1-85)इति सूत्रेण पत्युत्तरपदलक्षणो ण्यः। तत्र "भस्याढे तद्धिते" इति पुंवद्भावे सापत्य इति रूपम्।अत्र नकारो निवृत्तः। यद्यपि पत्युत्तरपदात् ण्यो विहितः तथापि 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति' परिभाषया पत्नीशब्दान्तादपि स भवति। एवञ्च शिवादिगणे सपत्नीशब्दः पठ्यते। स च रूढादेव प्रवर्तते। अतः आद्ययोः शिवाद्यणि सापत्न इति। तृतीयस्य यौगिकत्वेन न ततो अण् , किन्तु ण्यः सापत्यः। कौमुद्यामाद्ययोरित्यस्य "ङीनन्तसमानभर्तृकस्त्रीद्वयवाचकयोरित्यर्थः। एवं रूढयोरित्यनेनापि तयोरेव ग्रहणम्[2]"।

**भाष्यरीत्या द्वितीयशब्दो नास्ति**

"तसिलादिष्वाकृत्वसुचः" इति सूत्रे "भस्याढे तद्धिते" इति वार्तिकस्थ भाष्यात् द्वितीयशब्दो नास्त्येव। तत्रहि- "भस्याढे तद्धिते" भस्याढे तद्धिते पुंवद्भावो वक्तव्यः। हस्तिनीनां समूहो हास्तिकम्। अढ इति किमर्थम्। 'श्यैनेयः', 'रौहिणेयः' यद्यढ इत्युच्यते 'अग्नायी देवता अस्य स्थालीपाकस्य आग्नेयः' स्थालीपाकः अत्र न

---

[2]सिद्धान्तकौमुदी-बालमनोरमा यक्ता-पृ-383 सिद्धान्तकौमुदी-तत्वबोनी युक्ता-पृ-193.

प्राप्नोति। इह च प्राप्नोति-'कौण्डिन्यः सापत्नः' इति। यदि पुनरपत्ये इत्युच्येत। नैवं शक्यम्। इह हि न स्यात्- 'गार्ग्यायण्याः अपत्यं माणवको गार्गो जाल्मः'। अस्तु तर्हि अढ इत्येव। कथं कौण्डिन्यः, सापत्नः इति कौण्डिन्ये निपातनात्सिद्धम्। किं निपातनम्। अगस्त्यकौण्डिन्ययोरिति। सापत्नः प्रकृत्यन्तरत्वात्। सपत्नशब्दः प्रकृत्यन्तरमस्ति[3]। अत्र अढे इत्युक्ते सपत्नीशब्दादणि पुंवद्भावापत्या सापत्नः इति रूपं कथं वा सिध्यति। पुंवद्भावे सापतः इति भवेत्। अनपत्ये इत्युक्तौ तु अत्रापत्यप्रत्ययपरकत्वेन पुंवद्भावापत्तिर्नास्तीति भाष्याशयः। ततः अस्तु तर्हि अढे इत्येव कथं सपत्नः। इति प्रश्ने सापत्नः प्रकृत्यन्तरत्वात् सपत्नशब्दः प्रकृत्यन्तरमस्तीति समाहितम्।

**अत्र लघुशब्देन्दुशेखरकाराणामाशयः**

एतद्भाष्यस्य समन्वयः शब्देन्दुशेखरे नागेशेन इत्थं प्रदर्शितः- उपरिप्रदर्शितभाष्यस्थ शङ्कासमाधानाभ्यां कौमुद्यां प्रदर्शितः, तेन द्वितीयशब्दो नास्तीति ज्ञायते। यदि द्वितीयः शब्दः अस्ति तदा सपत्नी शब्दात् एकभर्तृकेत्यर्थकात् अणि तस्य नित्यस्त्रीलिङ्गत्वेन पुंवद्भावाभावेन सापत्नः इति सिध्या इदमेव समाधानं वक्तव्यं भाष्यकृता। परं तु भाष्यकृता सपत्नशब्दः प्रकृत्यन्तरमस्तीति समाहितम्। शिवादिगणे सपत्नीशब्दः पठितः ततश्चाविशेषात् (विनिगमनाविरहात्) शत्रुवाचकादिव समानस्वामिवाचकात् अणि पुंवद्भावेन सापतो दुर्वारः इति पूर्वपक्ष्याशयः। शिवादौ सपत्न इत्येव पठ्यते। ततश्च समानस्वामिवाचकात् सपत्नीशब्दात् तस्यापत्यम् इत्यणं बाधित्वा लिङ्गविशिष्टपरिभाषया "दित्यदित्यादित्यपत्युत्तरपदाण्यः" इति ण्ये पुंवद्भावे सापत्य इति[4]।

**तस्यायं भावः**

"भस्याढे तद्धिते" इत्यस्य ढभिन्ने तद्धिते परे भस्य पुंवद्भाव इत्यर्थः। समानः पतिः स्वामी यस्याः इत्यर्थे "नित्यं सपत्न्यादिषु" इति सपत्नी शब्दो निपातितः। समानस्य सादेशः नकारश्चान्तादेशः। अस्य शब्दस्य भाषितपुंस्कत्वेन पुंवद्भावे सापतः इति प्राप्नोति, न त्विष्टं सापत्नः इति सिध्यतीति शङ्कितुराशयः। समाधानमुक्तं सापत्नः प्रकृत्यन्तरत्वात् सपत्नशब्दः प्रकृत्यन्तरमस्तीति।

**अत्रायं गूढाभिसन्धिः**

सपत्नीशब्दात् नाण्प्रत्ययः, किन्तु सपत्न इत्यकारान्तः शत्रुपर्यायो अस्तीति तस्मादणि सापत्नः इति भवति। लिङ्गविशिष्टपरिभाषया सपत्नशब्दप्रकृतिकात् सपत्नी इति ङीनन्तात् अण्प्रत्यये तत्र पुंवद्भावे सत्यपि

---

[3]महाभाष्यम्-पृ-796,797.

[4]लघुशब्देन्दुशेखरः
(समासादिस्वरान्तो भागः)-पृ-97-100

सापत्नः इति रूपम्। तत्र नकारस्य स्वाभाविकत्वेन न निवृत्तिः। एवञ्च सपत्नस्यापत्यमित्यर्थे तत्प्रकृतिकङीनन्तात् सपत्न्या अपत्यमित्यर्थे वा सापत्न इति रूपं सिध्यति।

**अत्रेदं समालोचनीयम्-**

पूर्वपक्षिणा शिवादित्वादणि पुंवद्भाव आपादितः। शिवादिगणे सपत्नी इति स्त्रीलिङ्गपाठ इति तदाशयः। सपत्नशब्दात् तद्धिते नेयमापत्तिः इति सिद्धान्ती प्रणिगदति। शिवादिगणे सपत्न इत्यकारान्त एव पाठः इति तदाशयः।एवञ्च समानः पतिः यस्याः इति विग्रहे सपत्नीशब्दस्य निष्पत्तावपि न शिवाद्यणः प्रसक्तिः। यदि विवाहनिबन्धनं पतिशब्दमाश्रित्य सपत्नीशब्दो निष्पाद्यते तर्हि ततोणि तस्य नित्यस्त्रीलिङ्गत्वेन पुंवत्वस्याप्रसक्त्या सापत्नशब्दस्य निष्प्रत्यूहं सिद्धतया तत्परित्यागेन प्रकृत्यन्तराश्रयणेन तत्सिद्धिप्रदर्शनं भगवतोसंगतं स्यात्। यतो नैवमतो ज्ञायते विवाहनिबन्धनं पतिशब्दमाश्रित्य सपत्नीशब्दो न निष्पाद्यः इति।अतः सपत्नप्रकृतिकङीनन्तः एकः, स्वामिपर्यायपतिशब्दमाश्रित्य द्वितीयः इति द्वावेव सपत्नीशब्दौ। विवाहनिबन्धनं पतिशब्दमाश्रित्य कौमुद्यां सपत्नीशब्दप्रदर्शनं तु 'पा-रक्षणे' इति धातुस्थ माधवग्रन्थानुसारेण, न तु सिद्धान्तरीत्या[5]। एवं स्थिते कौमुद्यां आद्ययोरिति कथं घटेत? किञ्च तृतीयस्यापि मनोरमायां रूढतया प्रदर्शितत्वेन रूढयोरेव ग्रहणात् इति च कथं घटेत? इति शङ्का उदेति।

**भट्टोजीदीक्षितग्रन्थाशयः**

अत्र दीक्षितग्रन्थस्यैवं समन्वयः कर्तव्यः-आद्ययोः-सपत्नशब्दतत्प्रकृतिकङीनन्तयोः शिवाद्यण्। शिवादिगणे सपत्न इत्यकारान्तःपठितः स प्रकृतिः तद्धितस्य। अतः सः आद्यः। तत्प्रकृतिकङीनन्तादपि लिङ्गविशिष्टपरिभाषया अण् भवति, अतः अणः ङीनन्तोपि आद्यप्रकृतिः।

**समीक्षणम्**

एवञ्च एतावता परिशीलनेन इदं ज्ञायते यत्- कौमुद्यामाद्यशब्दः प्रकृतिपरः, प्रकृत्यन्तरत्वादिति भाष्ये अन्ये प्रकृतिर्यस्येति बहुव्रीहिणा तद्धितप्रत्ययस्य प्रकृतिः सपत्नशब्दः। तस्य प्रकृतित्वे ङीनन्तेपि लिङ्गविशिष्टपरिभाषया तद्धितस्य प्रकृतिरेव। अतः कौमुद्यामाद्ययोः इति घटते। अत एव रूढयोरिति च सङ्गच्छते। एवञ्चाद्ययोः- शत्रुवाचक सपत्नशब्दतत्प्रकृतिकङीनन्तयोः शिवाद्यण्- सापत्नः। स्वामिवाचकपतिशब्दमाश्रित्य निष्पन्नात् तृतीयात्तु नाण् =सपत्नादेवाण्। तेन सपत्नशब्दात् अण् भवति, तत्प्रकृतिक ङ्यन्तात् भवति, न तु कदापि तृतीयात्। न ह्ययं सपत्नशब्दः, नापि तत्प्रकृतिकः। तत्र हेतुः रूढयोरेव ग्रहणादिति। रूढयोः=सपत्नशब्दतत्प्रकृतिकङीनन्तयोरिति। अतः सिद्धान्तकौमुदी सिद्धान्तपरैव। अत्र युक्तायुक्तत्वं सुधियो विभावयन्तु।

---

[5]माधवीयधातुवृत्तिः-पृ-365